द्रावकरं, क्ली, (द्रावं सुवर्णादेर्द्रवं करोति स्वसंयोगेनेति । द्राव+कृ+टः ।) श्वेतटङ्कणम् । इति राजनिर्घण्टः ॥

द्रावणं, क्ली, (द्रावयति जलमलं स्वसम्पर्केणेति । द्रु+णिच्+युच् ।) कतकफलम् । इति रत्नमाला ॥ निर्म्मली इति भाषा ॥ (द्रावि+ल्युट् ।) विद्रावणञ्च ॥ (द्रावयतीति । द्रावि+ल्युः । पलायनकारयितरि, त्रि । यथा, महाभारते । ८ । ६४ । ६८ ।

"स देवयुक्तो रथसत्तमो नो
दुराधरो द्रावणः शात्रवाणाम् ॥")

द्राविका, स्त्री, (द्रावक+टाप् । अत इत्वञ्च ।) लाला । इति शब्दरत्नावली ॥

द्राविड़ः, त्रि, (द्राविड़ो देशोऽभिजनोऽस्येति । अण् ।) देशविशेषजातः । (यथा, महाभारते । ८ । १२ । १४ ।
"सात्यकिश्चेकितानश्च द्राविडैः सैनिकैः सह ॥")
पञ्चद्राविड़ाः । यथा, द्रविड़ः १ कर्णाटः २ गुर्जराटः ३ महाराष्ट्रः ४ तैलङ्गः ५ । यथा, स्कन्दपुराणे ।
"कर्णाटाश्चैव तैलङ्गा गुर्जरा राष्ट्रवासिनः ।
आन्ध्राश्च द्राविड़ाः पञ्च विन्ध्यदक्षिणवासिनः॥"
संख्याभेदः । वेधमुख्यः । इति मेदिनी । ड़, ३०॥ कर्चूरः । इति राजनिर्घण्टः ॥

द्राविड़कं, क्ली, (द्रविड़े देशे भवः । अण् ततः संज्ञायां कन् ।) विड़्लवणम् । इति राजनिर्घण्टः ॥

द्राविड़कः, पुं, (द्राविड़ एव । स्वार्थे कन् ।) वेधमुख्यकः । इत्यमरः । २ । ४ । १३५ । जिँयच यष्ठी इति भाषा ॥

द्राविड़भूतिकः, पुं, (द्राविड़ एव भूतिरुत्पत्तिस्थानं यस्य । कप् ।) द्राविड़कः । इति शब्दरत्नावली ॥

द्राविड़ी, स्त्री, (द्रविड़े भवा । द्रविड़+अण् । ङीप् ।) एला । इति राजनिर्घण्टः ॥ (इयं एला तु गुजराती इति ख्याता ॥ अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"सूक्ष्मोपकुञ्चिका तुच्छा कोरङ्गी द्राविड़ी
त्रुटिः ॥")

द्राव्यं, त्रि, (द्रु+ण्यत् ।) अवश्यगमनीयम् । अवश्यचरणीयम् । अवश्यानुतपनीयम् । इति द्रुधातोरवश्यम्भावार्थे घ्यण्प्रत्ययः ॥

द्राह, ऋ ङ जागरे । निक्षेपे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ऋ, अदद्राहत् । ङ, द्राहते । इति दुर्गादासः ॥

द्रु, स्रुतौ । गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) द्रवति । इति दुर्गादासः ॥

द्रु, र न उपतापे । इति कविकल्पद्रुमः ॥ (स्वां-परं-अकं सकं च-अनिट् ।) र, वैदिकः । न, द्रुणोति । उपताप इह उपतप्तीभावः उपतप्तीकरणञ्च । इति दुर्गादासः ॥

द्रुः, पुं. (द्रवति ऊर्द्ध्वं गच्छतीति । द्रु+मितद्र्वादित्वात् डुः ।) वृक्षः । इत्यमरः । २ । ४ । ५ ॥ (यथा, मनुः । ७ । १३१ ।
"आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम् ॥")
गतौ, स्त्री । इति शब्दरत्नावली ॥

द्रुकिलिमं, क्ली, (किल्यतेऽनेनेति । किल श्वैत्यक्रीड़नयोः+बाहुलकात् किमच् । द्रुषु वृक्षेषु किलिमम् ।) देवदारुवृक्षः । इत्यमरः । २ । ४ । ५३ ॥ (अस्य पर्य्यायो यथा वैद्यकरत्नमालायाम् ।
"देवदारुद्रुकिलिमं सुराह्वं भद्रदारु च ।
देवकाष्ठं पीतदारु देवदारु च दारु च ॥")

द्रुघणः, पुं, (द्रुर्वृक्षः हन्यतेऽनेनेति । हन+"करणेऽयोविद्रुषु ।" ३ । ३ । ८२ । इति अप् घनादेशश्च । "पूर्व्वपदात् संज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् । द्रुममयो घनः इति वा ।) मुद्गरः । इत्यमरः । २ । ८ । ९१ ॥ खड्गधारादिमुद्गराकारलौहमयास्त्रभेदः । इति भरतः ॥ (वैशम्पायनोक्तधनुर्व्वेदमतेऽयं परशुवल्लौहास्त्रम् । यदुक्तम् ।
"द्रुघणस्त्वायसाङ्गः स्यात् वक्रग्रीवो बृहच्छिराः ।
पञ्चाशदङ्गुलोत्सेधो मुष्टिसम्मितमण्डलः ॥"
अस्य चतस्रः क्रियाः । यथा,—
"उन्नामनं प्रपातश्च स्फोटनं दारणं तथा ।
चत्वार्य्येतानि द्रुघणे वल्गितानि श्रितानि वै ॥"
द्रुः संसारवृक्षो हन्यतेऽनेनेति ।) ब्रह्मा । कुठारः । इति मेदिनी । णे, ५३ ॥ भूमिचम्पकः । इति शब्दचन्द्रिका ॥ दन्त्यनान्तोऽपि ॥

द्रुड, मज्जने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।)' रेफयुक्तः । मज्जनमिति मस्जधातो रूपम् । द्रोड़ति प्रस्तरो जले । दुद्रोड़िषति । इति दुर्गादासः ॥

द्रुड, शि मज्जने । इति कविकल्पद्रुमः ॥ (तुदां-परं-अकं-सेट् ।) शि, द्रुड़ति अद्रुड़ीत् दुद्रोड़ । एषः कैश्चिन्न मन्यते । क्रमदीश्वरस्तु कुटादिमेव मन्यते । इति दुर्गादासः ॥

द्रुण, श जैह्म्ये । गतौ । वधे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) दन्त्यवर्गतृतीयादिः । श, द्रुणति दुद्रोणिषति । जैह्म्यं कुटिलीकरणम् । इति दुर्गादासः ॥

द्रुणं, क्ली, (द्रुणति छिनत्तीति । द्रुण+"इगुपधेति ।" ३ । १ । १३५ । इति कः ।) धनुः । खड्गः । इति हेमचन्द्रः ॥ ४ । २०७ ॥

द्रुणः, पुं, (द्रुणति छिनत्तीति । द्रुण+कः ।) वृश्चिकः । भृङ्गः । इति हेमचन्द्रः । ४ । २०७ ॥ त्रि, पिशुनः । इति शब्दमाला ॥

द्रुणसः, त्रि, (द्रुरिव दीर्घा नासिका यस्य । "अन्नासिकायाः संज्ञायां नसं चास्थूलात् ।" ५ । ४ । ११८ । इति अच् । नसादेशश्च । "पूर्व्वपदात् संज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् ।) दीर्घनासिकायुक्तः । इति सङ्क्षिप्तसारव्याकरणम् ॥

द्रुणहः, पुं, (द्रुणं खड्गं हन्ति गच्छतीति । हन् गतौ+डः ।) खड्गपिधानम् । इति हारावली । १२५ ॥

द्रुणा, स्त्री, (द्रुणां धनुराश्रयत्वेनास्त्यस्याः । अच् । टाप् ।) ज्या । इति हेमचन्द्रः । ३ । ४३६ ॥

द्रुणिः, स्त्री, (द्रुणति जलादिकमिति । द्रुण गतौ+"इगुपधात् कित् ।" उणां । ४ । ११८ । इति इन् ।) द्रोणी । इत्यमरटीकायां भरतः ॥

द्रुणी, स्त्री, (द्रुणि+ङीष् । वा ङीष् ।) कर्णजलौकाः । कच्छपी । इति लिङ्गादिसंग्रहे अमरभरतौ ॥ काष्ठाम्बुवाहिनी । इति द्रोणीशब्दटीकायां भरतः ॥

द्रुतं, त्रि, (द्रवति स्मेति । द्रु+गत्यर्थेति कर्त्तरि क्तः ।) जातद्रवीभावघृतसुवर्णादि । तत्पर्य्यायः । अवदीर्णम् २ विलीनम् ३ विद्रुतम् ४ । इत्यमरः । ३ । १ । १०० ॥ शीघ्रम् । (यथा, महाभारते । १३ । २६ । ८१ ।
"वायूरिताभिः सुमनोहराभि-
र्द्रुताभिरत्यर्थसमुत्थिताभिः ।
गङ्गोर्म्मिभिर्भानुमतीभिरिद्धाः
सहस्ररश्मिप्रतिमा भवन्ति ॥")
विद्रावम् । पलायितम् । इति मेदिनी । ते, २५॥ (यथा, रघुः । ६ । ५६ ।
"जग्राह स द्रुतवराहकुलस्य मार्गं
सुव्यक्तमार्द्रपदपङ्क्तिभिरायताभिः ॥")

द्रुतं, क्ली, (द्रु+क्तः ।) नृत्यविषयकशीघ्रगमनम् । तत्पर्य्यायः । ओघः २ । इत्यमरः १ । २ । ९८ ॥ शीघ्रलयः । इति मधुः ॥ नृत्यगीतादौ द्रवन्ति गच्छन्ति समुदायगतिप्रदर्शनार्थं करादयोऽत्र । इति भरतः ॥ साङ्गे ।
"द्रुतामध्ययने वृत्तिं प्रयोगार्थं तु मध्यमाम् ।
शिष्याणामुपदेशार्थं विलम्बितां समाचरेत् ॥"
इति वेदव्यवस्था ॥
(क्षिप्रम् । यथा, मनुः । ६ । १७२ ।
"अभ्याघातेषु मध्यस्थान् शिष्याश्चौरानिव
द्रुतम् ॥"
क्रियाविशेषणत्वादस्य क्लीवता ॥)

द्रुतः, पुं, (द्रवति स्म ऊर्द्ध्वमिति । द्रु+क्तः ।) द्रुमः । इति धरणिः ॥

द्रुनखः, पुं, (द्रोर्वृक्षस्य नख इव । असंज्ञात्वात् अत्र णत्वाभावः ।) कण्टकम् । इति त्रिकाण्डशेषः ॥

द्रुपदः, पुं, पञ्चालदेशीयचन्द्रवंशीयराजविशेषः । तस्य कन्या द्रौपदी । पुत्त्रौ शिखण्डिधृष्टद्युम्नौ । इति महाभारतम् ॥ (क्ली, यूपैकदेशः । यथा, ऋग्वेदे । १ । २४ । १३ ।
"शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः ।"
"द्रुपदेषु द्रोः काष्ठस्य यूपस्य पदेषु प्रदेशविशेषेषु बद्धः ।" इति तद्भाष्ये सायनः ॥ काष्ठपादुका । यथा, वाजसनेयसंहितायाम् ।२०।२०।
"द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव ॥"
"द्रुस्तरुस्तन्मयं पदं द्रुपदं पादुका तस्मान्मुचानः पृथग् भवन् ।" इति वेददीपः ॥)

द्रुपदा, स्त्री, ऋक् । सा च वैदिकमन्त्रविशेषः । यथा, उच्छिष्टस्य चाण्डालादिस्पर्शे आपस्तम्बः ।